किन्तु घटत्वादिप्रकारकप्रत्यक्षत्वं घटत्वादिज्ञानं विनापि जायमाने सामान्यलक्षणाजन्यघटादिमुख्यविशेष्यकप्रत्यक्षे व्यभिचारवारणाय विषयत्वमपहाय प्रकारिताप्रवेशः। प्रकारिता चालौकिकी ग्राह्या तेन निर्विकल्पकजन्यप्राथमिकतद्विशिष्टलौकिकप्रत्यक्षे न व्यभिचारः। न चैवं ज्ञानलक्षणासन्निकर्षो लौकिकसन्निकर्षद्वयमेव यत्र वर्त्तते तत्र कीदृक् ज्ञानं स्यादिति वाच्यं तत्र लौकिकालौकिकोभयतत्प्रकारिताकज्ञानस्यैव उत्पत्तेः विषयतायाः साङ्कर्य्यस्यादोषत्वात्। न च तत्प्रकारकज्ञानं विनापि जायमाने योगजधर्मजतत्प्रकारकप्रत्यक्षे व्यभिचार इति वाच्यं योगजधर्मजन्यतदवच्छेदकतज्जात्यवच्छिन्नान्यत्वेन प्रत्यक्षविशेषणात् तत्प्रकारकज्ञानं विना योगजधर्मेणापि तत्प्रकारकप्रत्यक्षजननात् योगजधर्मस्य निर्विकल्पकाजनकत्वात्। न च चक्षुःसंयोगजन्यनिर्विकल्पकसहकारेण योगजधर्मजनिते तत्प्रकारकप्रत्यक्षे व्यभिचार इति वाच्यम् तत्र निर्विकल्पकजनकीभूतचक्षुःसंयोगादिसत्त्वे तत्प्रकारकलौकिकप्रत्यक्षस्यैव उत्पत्तेः अलौकिकप्रत्यक्षजनकयोगजधर्मसत्त्वेऽपि यथोक्तकार्य्यकारणभावस्यैव बाधकत्वेनालौकिकप्रत्यक्षस्यानुत्पत्तेः। न चैवं निर्विकल्पकोत्पत्तिकाले चक्षुःसंयोगादिनाशे तन्निर्विकल्पकसहकारेण योगजधर्म्मात्तत्प्रकारकसाक्षात्कारो न स्यादिति वाच्यम् इष्टापत्तेः। न चैवं तत्प्रकारकप्रत्यक्ष एव तज्ज्ञानस्य हेतुतया इदं रजतमिति शुक्तिविशेष्यकमानसभ्रमे शुक्तिज्ञानस्याहेतुतया शुक्तिज्ञानं विनापि तादृशभ्रमापत्तिरिति वाच्यं इदं रजतमिति शुक्तिविशेष्यकमानसभ्रमस्यापि शुक्तिज्ञानात्मकशुक्तिविशिष्टधीकारणसत्त्वेन यत्र कुत्रचिद्धर्मिणि शुक्तिप्रकारकत्वनियमात्। शुक्तिज्ञानविरहस्थले शुक्तिप्रकारकज्ञानसामान्यकारणविरहादेव तदभावात् विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः फलोपधायकत्वात्। न चेदं रजतमिति शुक्तिविशेष्यकमानसभ्रमस्य न शुक्तिप्रकारकत्वनियमः शुक्तिप्रकारकज्ञानप्रतिबन्धकदोषसत्त्वे तत्र तस्याः योगाप्रकारत्वादिति वाच्यं शुक्तिमुख्यविशेष्यकतादृशमानसभ्रमस्थले तादृशदोषे मानाभावात् लाघवाद्यथोक्तरूपेण ज्ञानलक्षणायाः कार्य्यकारणभावकल्पने फलबलेन तथैव कल्पनात्। न चैवं मानसोपनीतभाने उपनीतस्य मुख्यविशेष्यतया भाने मानाभावः। मुख्यविशेष्यकत्वस्य कार्य्यतानवच्छेदकतया सामग्र्यास्तत्र मानत्वासम्भवात् इति वाच्यं मुख्यविशेष्यत्वस्य कारणानियम्यतया बाधकासत्त्व एव मुख्यविशेष्यतया भानसम्भवात्, न चैवं मानसोपनीतभानवत् बहिरिन्द्रियजोपनीतभानेऽप्युपनीतस्य प्रकारत्वमुख्यविशेष्यत्वलक्षणद्विविधविषयतापत्तिरिति वाच्यं सामान्यलक्षणालौकिकसन्निकर्षजन्यातिरिक्तस्य बहिरिन्द्रियजतत्तन्मुख्यविशेष्यकप्रत्यक्षस्यानुभवासिद्धतया अलीकतया यावद्विशेषसामग्रीबाधादेव तद्बाधात् मानसस्य तत्तदतिरिक्तस्यापि इदं रजतमित्याद्युपनीतविशेष्यकभ्रमस्य उपनीतशुक्त्यादिमुख्यविशेष्यकत्वमनुभवसिद्धमतोनालीकत्वं न च तथापि घटघटत्वादिनिर्विकल्पकोत्तरं जायमानेऽयं घट इत्यादिविशिष्टप्रत्यक्षे घटत्वादेर्मुख्यविशेष्यत्वापत्तिः लौकिकसन्निकर्षरूपविशेषसामग्रीसत्त्वादिति वाच्यम् तथाप्यसतिबाधके घटाद्यंशे घटत्वादेः प्रकारत्ववन्मुख्यविशेष्यत्वस्यापीष्टत्वादिति। केचित्तु संसर्गावच्छिन्नतद्विषयताशालिज्ञानत्वेन कारणता योगजधर्म्माजन्यसामान्यलक्षणाप्रत्यासत्त्यजन्यतद्विषयकप्रत्यक्षत्वेन कार्य्यता तद्विषयता। चालौकिकी ग्राह्या तेन तल्लौकिकप्रत्यक्षे न व्यभिचारः:। एवञ्च तद्विषयकप्रत्यक्षत्वमात्रस्य कार्य्यतावच्छेदकतया इदं रजतमिति शुक्तिमुख्यविशेष्यकमानसभ्रमोऽपि न शुक्तिज्ञानं विना बहिरिन्द्रियजोपनीतभाने उपनीतस्य मुख्यविशेष्यत्वनिरासश्चोक्तक्रमेणेत्याहुरिति संक्षेपः।”

मीमांसकवेदान्तिभिस्तु अस्याः प्रत्यासत्तित्वं नाङ्गीकृतम्। यथोक्तं वेदा०प०। “न च ज्ञानं प्रत्यासत्तिः ज्ञानस्य प्रत्यासत्तित्वे अनुमानमात्रोच्छेदप्रसङ्गः” इति। अस्यायमाशयः वह्निव्याप्यधूमवान् पर्वत इति परामर्शात्मकज्ञानस्य अनुमितिहेतुतायाः सर्वैः स्वीकारात् तज्ज्ञानस्य च वह्निविषयकत्वेन तदुत्तरं जायमानं वह्निमान् पर्वत इति ज्ञानमलौकिकप्रत्यक्षमेव स्यान्नानुमितिः न च समानविषयस्थले अनुमितिसामग्र्याः अलौकिकप्रत्यक्षसामग्र्याः प्रतिबन्धकत्वेन नालौकिकप्रत्यक्षमपि तु अनुमितिर्भविष्यतीति चेन्न तादृशप्रतिबध्यप्रतिबन्धकभावकल्पनस्याप्रामाणिकत्वात्। अतएव इदं रजतमिति ज्ञानमनिर्वचनीयरजतविषयकं न देशान्तरस्थानुभूतरजतविषयकमुपनयमर्य्यादया ज्ञानमिति स्थितम्।

**ज्ञानवापी** स्त्री काशीस्थे वापीरूपे तीर्थभेदे तदाविर्भावादि कथा काशी० १२ अ०।

“घटोद्भव!, महाप्राज्ञ! शृणु पापापनोदिनीम्।